सूर्यकवचसमेतम्

आदित्यहृदयं प्रारभ्यते ॥

मूल्यम् 6 आणकः



श्रीगणेशाय नमः ॥ ॥ आचम्य देशकालौ संकीर्त्य ममारोग्या-
वाप्तये श्रीसवितृसूर्यनारायणप्रीत्यर्थं द्वादशनमस्काराख्यं कर्म
करिष्ये ॥ ॥ अथ ध्यानम् ॥ ध्येयः सदा सवितृमंडलमध्यवर्ती
नारायणः सरसिजासनसंनिविष्टः॥केयूरवान्मकरकुंडलवान्किः-
रीटी हारी हिरण्मयवपुर्धृतशंखचक्रः॥१॥ एकचक्रो रथो यस्य
दिव्यः कनकभूषितः॥ स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः
॥२॥मित्राय नमः॥ रवये नमः॥ सूर्याय नमः॥ भानवे नमः॥
खगाय नमः॥ पूष्णे नमः॥ हिरण्यगर्भाय नमः॥ मरीचये
नमः॥ आदित्याय नमः॥सवित्रे नमः॥ अर्काय नमः॥ भास्क-
राय नमः॥ १२ ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थि-
तिनाशहेतवे॥ त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायण-
शंकरात्मने॥१॥नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वित-

संभवात्मने ॥ सहस्रयोगोद्भवभावभागिने सहस्रसंख्यायुगधा-
रिणे नमः ॥ २ ॥ आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने ॥
जन्मांतरसहस्रेषु दारिद्र्यं नोपजायते ॥ ३ ॥ इति नमस्काराः ॥
॥ शतानीक उवाच ॥ ॥ कथमादित्यमुद्यंतमुपतिष्ठेद्द्विजोत्तम ॥
एतन्मे ब्रूहि विप्रेंद्र प्रपद्ये शरणं तव ॥ १ ॥ ॥ सुमंतुरुवाच ॥
॥ इदमेव पुरा पृष्टं शंखचक्रगदाधरम् ॥ प्रणम्य शिरसा देवम-
र्जुनेन महात्मना ॥ २ ॥ कुरुक्षेत्रे महाराज निवृत्ते भारते रणे ॥
कृष्णनाथं समासाद्य प्रार्थयित्वाऽब्रवीदिदम् ॥ ३ ॥ ॥ अर्जुन
उवाच ॥ ॥ ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा ॥ मया
कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥ ४ ॥ सूर्यस्तुतिमयं न्यासं
वक्तुमर्हसि माधव ॥ भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः
॥ ५ ॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् ॥ तदहं श्रोतु-

मिच्छामि त्वत्प्रसादेन यादव ॥६॥ ॥ श्रीभगवानुवाच ॥ रुद्रादिदैवतैः सर्वैः पृष्टेन कथितं मया ॥ वक्ष्येऽहं सूर्यविन्यासं शृणु पांडव यत्नतः ॥७॥ अस्माकं यत्त्वया पृष्टमेकचित्तो भवार्जुन ॥ तदहं संप्रवक्ष्यामि आदिमध्यावसानकम् ॥ ८ ॥ ॥ अर्जुन उवाच ॥ नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशः॥ कथमादित्यमुद्यंतमुपतिष्ठेत्सनातनम् ॥९॥ ॥ श्रीभगवानुवाच ॥ साधु पार्थ महाबाहो बुद्धिमानसि पांडव ॥ यन्मां पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥१०॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ॥ सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥ ११ ॥ अमित्रदमनं पार्थ संग्रामे जयमुत्तमम् ॥ वर्धनं धनपुत्राणामादित्यहृदयं शृणु ॥ १२ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ त्रिषु लोकेषु विख्यातं निःश्रेयसकरं परम् ॥ १३ ॥ देवदेवं नमस्कृत्य

प्रातरुत्थाय चार्जुन ॥ विघ्नान्यनेकरूपाणि नश्यंति स्मरणादपि ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन सूर्यमाराधयेत्सदा ॥ आदित्यहृदयं नित्यं जाप्यं तच्छृणु पांडव ॥ १५ ॥ यज्जपन्मुच्यते जंतुर्दारिद्र्यादाशु दुस्तरात् ॥ लभते च महासिद्धिं कुष्ठव्याधिविनाशनम् ॥१६॥ अस्मिन्मंत्रे ऋषिश्छंदो देवता शक्तिरेव च ॥ सर्वमेव महाबाहो कथयामि तवाग्रतः ॥ १७ ॥ मयातो गोपितं न्यासं सर्वशास्त्रप्रबोधितम् ॥ अथ ते कथयिष्यामि उत्तमं मंत्रमेव च ॥ १८ ॥ ॐ अस्य श्रीआदित्यहृदयस्तोत्रमंत्रस्य ॥ श्रीकृष्ण ऋषिः॥श्रीसूर्यात्मा त्रिभुवनेश्वरो देवता ॥ अनुष्टुप् छंदः॥ हरितहयरथं दिवाकरं घृणिरिति बीजम् ॥ ॐ नमो भगवते जितवैश्वानर जातवेदस इति शक्तिः॥ ॐ नमो भगवते आदित्याय नम इति कीलकम् ॥ ॐ अग्निगर्भदेवता इति मंत्रः ॥ ॐ नमो

भगवते तुभ्यमादित्याय नमो नमः ॥ श्रीसूर्यनारायणप्रीत्यर्थे जपे विनियोगः ॥ ॥ अथ न्यासः ॥ ॥ ॐ हाँ अंगुष्ठाभ्यां नमः ॥ ॐ हीं तर्जनीभ्यां नमः ॥ ॐ हूं मध्यमाभ्यां नमः ॥ ॐ हैं अनामिकाभ्यां नमः ॥ ॐ हौं कनिष्ठिकाभ्यां नमः ॥ ॐ हः करतलकरपृष्ठाभ्यां नमः ॥ ॐ हां हृदयाय नमः ॥ ॐ हीं शिरसे स्वाहा ॥ ॐ हूं शिखायै वषट् ॥ ॐ हैं कवचाय हुम् ॥ ॐ हौं नेत्रत्रयाय वौषट् ॥ ॐ हः अस्त्राय फट् ॥ ॐ हांहींहूंहैंहौंहः इति दिग्बंधः ॥ अथ ध्यानम् ॥ ॥ भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचा रंजितश्चारुकेशो भास्वान्वै दिव्यतेजाः करकमलयुतः स्वर्णवर्णः प्रभाभिः ॥ विश्वाकाशावकाशग्रहपतिशिखरे भाति यश्चोदयाद्रौ सर्वानंदप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः ॥१॥ पूर्वमष्टदलं पद्मं प्रणवादिप्रति-

ष्ठितम् ॥ मायाबीजं दलाष्टाग्रे यंत्रमुद्धारयेदिति ॥ २ ॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ॥ मार्तंडं तपनं चेति दलेष्वष्टसु योजयेत् ॥ ३ ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥ अमोघा विद्युता चेति मध्ये श्रीः सर्वतोमुखी ॥ ४ ॥ सर्वज्ञः सर्वगश्चैव सर्वकारणदेवता ॥ सर्वेशं सर्वहृदयं नमामि सर्वसाक्षिणम् ॥ ५ ॥ सर्वात्मा सर्वकर्ता च सृष्टिजीवनपालकः ॥ हितः स्वर्गापवर्गश्च भास्करेश नमोऽस्तु ते ॥ ६ ॥ ॥ इति प्रार्थना ॥ ॥ नमो नमस्तेऽस्तु सदा विभावसो सर्वात्मने सप्तहयाय भानवे ॥ अनंतशक्ते मणिभूषणेन ददस्व भुक्तिं मम मुक्तिमव्ययाम् ॥ ७ ॥ अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्यसेत् ॥ विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरम् ॥ ८ ॥ नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् ॥ पर्जन्यमोष्ठयोश्चैव तीक्ष्णं

जिह्वांतरे न्यसेत् ॥ ९ ॥ सुवर्णरेतसं कंठे स्कंधयोस्तिग्मतेजसम् ॥ बाह्वोस्तु पूषणं चैव मित्रं वै पृष्ठतो न्यसेत् ॥ १० ॥ वरुणं दक्षिणे हस्ते त्वष्टारं वामतः करे ॥ हस्तावुष्णकरः पातु हृदयं पातु भानुमान् ॥ ११ ॥ उदरे तु यमं विद्यादादित्यं नाभिमंडले ॥ कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत् ॥ १२ ॥ जान्वोस्तु गोपतिं न्यस्य सवितारं तु जंघयोः ॥ पादयोश्च विवस्वंतं गुल्फयोश्च दिवाकरम् ॥१३॥ बाह्यतस्तु तमोध्वंसं भगमभ्यंतरे न्यसेत् ॥ सर्वांगेषु सहस्रांशुं दिग्विदिक्षु भगं न्यसेत् ॥ १४ ॥ इति दिग्बंधः ॥ एष आदित्यविन्यासो देवानामपि दुर्लभः ॥ इमं भक्त्या न्यसेत्पार्थ स याति परमां गतिम् ॥ १५ ॥ कामक्रोधकृतात्पापान्मुच्यते नात्र संशयः ॥ सर्पादपि भयं नैव संग्रामेषु पथिष्वपि ॥ १६ ॥ रिपुसंघट्टकालेषु तथा चोरसमागमे ॥

त्रिसंध्यं जपतो न्यासं महापातकनाशनम् ॥१७॥ विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवम् ॥ शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशनम् ॥१८॥ कुष्ठव्याधिस्तथा दद्रू रोगाश्च विविधाश्च ये ॥ जपमानस्य नश्यंति शृणु भक्त्या तदर्जुन॥१९॥ आदित्यो मंत्रसंयुक्त आदित्यो भुवनेश्वरः ॥ आदित्यान्नापरो देवो ह्यादित्यः परमेश्वरः ॥२०॥ आदित्यमर्चयेद्ब्रह्मा शिव आदित्यमर्चयेत् ॥ यदादित्यमयं तेजो मम तेजस्तदर्जुन ॥ २१ ॥ आदित्यं मंत्रसंयुक्तमादित्यं भुवनेश्वरम् ॥ आदित्यं ये प्रपश्यंति मां पश्यंति न संशयः ॥ २२ ॥ त्रिसंध्यमर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नरः ॥ न स पश्यति दारिद्र्यं जन्मजन्मनि चार्जुन ॥ २३ ॥ एतत्ते कथितं पार्थ आदित्यहृदयं मया ॥ मुच्यते सर्वपापेभ्यः सूर्यलोके महीयते ॥ २४ ॥ नमो भगवते तुभ्यमादित्याय नमो

नमः ॥ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥२५॥
सुवर्णसदृशो भानुः स्फुरितो विश्वतापनः ॥ रविर्विश्वो महा-
तेजाः सुवर्णः सुप्रबोधकः ॥ २६ ॥ हिरण्यगर्भस्त्रिशिरास्तपनो
भास्करो रविः ॥ मार्तंडो गोपतिः श्रीमान्कृतज्ञश्च प्रतापवान्
॥२७॥ तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः ॥ शुद्धो वि-
रोचनः केशी सहस्रांशुर्महाप्रभुः ॥ २८ ॥ विवस्वान्पूषणो मृत्यु-
र्मिहिरो जामदग्न्यजित् ॥ घर्मरश्मिः पतंगश्च शरण्यो मित्रहा
तपः ॥ २९ ॥ दुर्विज्ञेयगतिः शूरस्तेजोराशिर्महायशाः ॥ शंभु-
श्चित्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥ ३० ॥ अंशुमानुत्तमो
देव ऋग्यजुः साम एव च ॥ हरिदश्वस्तमोदारः सप्तसप्तिर्मरी-
चिमान् ॥ ३१ ॥ अग्निगर्भोऽदितेः पुत्रः शंभुस्तिमिरनाशनः ॥
पूषा विश्वंभरी मित्रः सुवर्णः सुप्रतापवान् ॥ ३२ ॥ अतपी

मंडली भास्वान् तपनः सर्वतापनः ॥ कृतविश्वो महातेजाः सर्व-
रत्नमयोद्भवः ॥ ३३ ॥ अक्षरश्च क्षरश्चैव प्रभाकरविभाकरौ ॥
चंद्रश्चंद्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥ ३४ ॥ अंगारकोऽ-
गदो हस्ती रक्तांगश्चांगवर्धनः ॥ बुधो बुद्धासनो बुद्धिर्बुद्धात्मा
बुद्धिवर्धनः ॥ ३५ ॥ बृहद्भानुर्बृहद्भासो बृहद्भामा बृहस्पतिः ॥
शुक्रस्त्वं शुक्ररेतास्त्वं शुक्रांगः शुक्रभूषणः ॥ ३६ ॥ शनिमा-
न्शनिरूपस्त्वं शनैर्गच्छसि सर्वदा ॥ अनादिरादिरादित्यस्तेजो-
राशिर्महातपाः ॥ ३७ ॥ अनादिरादिरूपस्त्वमादित्यो दिक्प-
तिर्यमः ॥ भानुमान्भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ॥ ३८ ॥
धूमकेतुर्महाकेतुः सर्वकेतुरनुत्तमः ॥ तिमिरावरणः शंभुः स्रष्टा
मार्तंड एव च ॥ ३९ ॥ नमः पूर्वाय गिरये पश्चिमाय नमो
नमः ॥ नमोत्तराय गिरये दक्षिणाय नमो नमः ॥ ४० ॥

नमो नमः सहस्रांशो ह्यादित्याय नमो नमः ॥ नमः पद्मप्रबो-
धाय नमस्ते द्वादशात्मने ॥ ४१ ॥ नमो विश्वप्रबोधाय नमो
भ्राजिष्णुजिष्णवे ॥ ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो
नमः ॥ ४२ ॥ प्रदीप्ताय प्रगल्भाय युगांताय नमो नमः ॥
नमस्ते होतृपतये पृथिवीपतये नमः ॥ ४३ ॥ नमोंकार वषट्कार
सर्वयज्ञ नमोऽस्तु ते ॥ ऋग्वेदादिर्यजुर्वेद सामवेद नमोऽस्तु
ते ॥ ४४ ॥ नमो हाटकवर्णाय भास्कराय नमो नमः ॥ जया-
य जयभद्राय हरिदश्वाय ते नमः ॥ ४५ ॥ दिव्याय दिव्यरू-
पाय ग्रहाणां पतये नमः ॥ नमस्ते शुचये नित्यं नमः कुरुकु-
लात्मने ॥४६॥ नमस्त्रैलोक्यनाथाय भूतानां पतये नमः ॥ नमः
कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥ ४७ ॥ त्वं ज्योतिस्त्वं द्युति-
र्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः ॥ त्वमेव रुद्रो रुद्रात्मा वायुर-

मिस्त्वमेव च ॥ ४८ ॥ योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ॥ एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ॥ ४९ ॥ नवयोजनलक्षाणि सहस्रद्विशतानि च ॥ यावद्भटीप्रमाणेन क्रममाण नमोऽस्तु ते ॥ ५० ॥ अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः ॥ पार्श्वतश्च नमस्तुभ्यं नमस्ते चास्तु सर्वदा ॥५१॥ नमः सुरारिहंत्रे च सोमसूर्याग्निचक्षुषे ॥ नमो दिव्याय व्योमाय सर्वतंत्रमयाय च ॥५२॥ नमो वेदांतवेद्याय सर्वकर्मादिसाक्षिणे ॥ नमो हरितवर्णाय सुवर्णाय नमो नमः ॥५३॥ अरुणो माघमासे तु सूर्यो वै फाल्गुने तथा ॥ चैत्रमासे तु वेदांगो भानुर्वैशाखतापनः ॥ ५४ ॥ ज्येष्ठमासे तपेदिंद्र आषाढे तपते रविः ॥ गभस्तिः श्रावणे मासे यमो भाद्रपदे तथा ॥ ५५ ॥ इषे सुवर्णरेताश्च कार्तिके च दिवाकरः ॥ मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः

॥ ५६ ॥ पुरुषस्त्वधिके मासे मासाधिक्येषु कल्पयेत् ॥ इत्येते द्वादशादित्याः काश्यपेयाःप्रकीर्तिताः॥५७॥ उग्ररूपा महात्मानस्तपंते विश्वरूपिणः ॥ धर्मार्थकाममोक्षाणां प्रस्फुटा हेतवो नृप ॥ ५८ ॥ सर्वपापहरं चैवमादित्यं संप्रपूजयेत् ॥ एकधा दशधा चैव शतधा च सहस्रधा॥५९॥तपंते विश्वरूपेण सृजंति संहरंति च ॥ एष विष्णुः शिवश्चैव ब्रह्मा चैव प्रजापतिः ॥ ६० ॥ महेंद्रश्चैव कालश्च यमो वरुण एव च ॥ नक्षत्रग्रहताराणामधिपो विश्वतापनः ॥ ६१ ॥ वायुरग्निर्धनाध्यक्षो भूतकर्ता स्वयंप्रभुः ॥ एष देवो हि देवानां सर्वमाप्यायते जगत् ॥६२॥ एष कर्ता हि भूतानां संहर्ता रक्षकस्तथा॥ एष लोकानुलोकश्च सप्तद्वीपाश्च सागराः ॥६३॥एष पातालसप्तस्थो दैत्यदानवराक्षसाः॥ एष धाता विधाता च बीजं क्षेत्रं प्रजापतिः ॥ ६४ ॥ एष एव प्रजा नित्यं संवर्ध-

यति रश्मिभिः ॥ एष यज्ञः स्वधा स्वाहा ह्रीः श्रीश्च पुरुषोत्तमः ॥६५॥एष भूतात्मको देवः सूक्ष्मोऽव्यक्तः सनातनः॥ईश्वरः सर्वभूतानां परमेष्ठी प्रजापतिः॥६६॥कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ॥ जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥ ६७ ॥ दारिद्र्यव्यसनध्वंसी श्रीमान्देवो दिवाकरः॥ विकर्तनो विवस्वांश्च मार्तंडो भास्करो रविः॥६८॥ लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः॥ लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ॥ ६९ ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ गभस्तिहस्तो ब्रह्मण्यः सर्वदेवनमस्कृतः ॥ ७० ॥ आयुरारोग्यमैश्वर्यं नरा नार्यश्च मंदिरे ॥ यस्य प्रसादात्संतुष्टिरादित्यहृदयं जपेत् ॥७१॥ इत्येतैर्नामभिः पार्थ आदित्यं स्तौति नित्यशः ॥ प्रातरुत्थाय कौन्तेय तस्य रोगभयं नहि ॥ ७२ ॥ पातकान्मुच्यते पार्थ

व्याधिभ्यश्च न संशयः ॥ एकसंध्यं द्विसंध्यं वा सर्वपापैः प्रमुच्यते ॥ ७३ ॥ त्रिसंध्यं जपमानस्तु पश्येच्च परमं पदम् ॥ यदह्ना कुरुते पापं तदह्ना प्रतिमुच्यते ॥ ७४ ॥ यद्रात्र्या कुरुते पापं तद्रात्र्या प्रतिमुच्यते ॥ दद्रुस्फोटककुष्ठानि मंडलानि विषूचिका ॥७५॥ सर्वव्याधिमहारोगभूतबाधास्तथैव च ॥ डाकिनी शाकिनी चैव महारोगभयं कुतः ॥ ७६ ॥ ये चान्ये दुष्टरोगाश्च ज्वरातीसारकादयः ॥ जपमानस्य नश्यंति जीवेच्च शरदां शतम् ॥ ७७ ॥ संवत्सरेण मरणं यदा तस्य ध्रुवं भवेत् ॥ अशीर्षां पश्यति च्छायामहोरात्रं धनंजय ॥ ७८ ॥ यस्त्विदं पठते भक्त्या भानोर्वारे महात्मनः ॥ प्रातःस्नाने कृते पार्थ एकाग्रकृतमानसः ॥ ७९ ॥ सुवर्णचक्षुर्भवति न चांधस्तु प्रजायते ॥ पुत्रवान् धनसंपन्नो जायते चारुजः सुखी ॥ ८० ॥

सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत् ॥ आदित्यहृदयं पुण्यं सूर्यनामविभूषितम् ॥ ८१ ॥ श्रुत्वा च निखिलं पार्थ सर्वपापैः प्रमुच्यते ॥ अतः परतरं नास्ति सिद्धिकामस्य पांडव ॥ ८२ ॥ एतज्जपस्व कौंतेय येन श्रेयो ह्यवाप्स्यसि ॥ आदित्यहृदयं नित्यं यः पठेत्सुसमाहितः ॥ ८३ ॥ भ्रूणहा मुच्यते पापात्कृतघ्नो ब्रह्मघातकः॥गोघ्नः सुरापो दुर्भोजी दुष्प्रतिग्रहकारकः ॥८४॥ पातकानि च सर्वाणि दहत्येव न संशयः ॥ य इदं शृणुयान्नित्यं जपेद्वापि समाहितः ॥ ८५ ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥ ८६ ॥ कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा ॥ यस्त्वादित्यदिने पार्थ नाभिमात्रजले स्थितः ॥ ८७ ॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः ॥ जपते मानवो भक्त्या शृणुयाद्वापि भक्तितः

॥८८॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ अमित्रदमनं पार्थ यदा कर्तुं समारभेत् ॥८९॥ सम्यक् प्रतिकृतिं कृत्वा शत्रोश्च रणपांसुभिः॥आक्रम्य वामपादेन आदित्यहृदयं जपेत् ॥९०॥ एतन्मंत्रं समाहूय सर्वसिद्धिकरं परम् ॥ ॐ ह्रीं हिमालीढं स्वाहा ॥ ॐ ह्रीं निलीढं स्वाहा ॥ ॐ ह्रीं मालीढं स्वाहा ॥ इति मंत्रः ॥ त्रिभिश्च रोगी भवति ज्वरी भवति पंचभिः॥जपैस्तु सप्तभिः पार्थ राक्षसीं तनुमाविशेत् ॥९१॥ राक्षसेनाभिभूतस्य विकारान् शृणु पांडव ॥ गायते नृत्यते नग्न आस्फोटयति धावति ॥ ९२ ॥ शिवारुतं च कुरुते हसते क्रंदते पुनः ॥ एवं संपीड्यते पार्थ यद्यपि स्यान्महेश्वरः ॥९३॥ किं पुनर्मानुषः कश्चिच्छौचाचारविवर्जितः ॥ पीडितस्य न संदेहो ज्वरो भवति दारुणः ॥ ९४ ॥ यदा चानुग्रहं तस्य कर्तुमिच्छेच्छुभंकरम् ॥ तदा सलिलमादाय जपे-

न्मंत्रमिमं बुधः ॥ ९५ ॥ नमो भगवते तुभ्यमादित्याय नमो नमः ॥ जयाय जयभद्राय हरिदश्वाय ते नमः ॥ ९६ ॥ स्नापयेत्तेन मंत्रेण शुभं भवति नान्यथा ॥ अन्यथा च भवेद्देषो नश्यते नात्र संशयः ॥ ९७ ॥ स्तवस्ते निखिलः प्रोक्तः पूजां चैव निबोध मे ॥ उपलिप्ते शुचौ देशे नियतो वाग्यतः शुचिः ॥ ९८ ॥ वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचिः ॥ त्रिधा तत्र लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥ ९९ ॥ अष्टपत्रं लिखेत्पद्मं लिप्तगोमयमंडले ॥ पूर्वपत्रे लिखेत्सूर्यमाग्नेये तु रविं न्यसेत् ॥ १०० ॥ याम्यायां च विवस्वंतं नैर्ऋत्यां तु भगं न्यसेत् ॥ प्रतीच्यां वरुणं विद्याद्वायव्यां मित्रमेव च ॥ १ ॥ आदित्यमुत्तरे पत्रे ईशान्यां विष्णुमेव च ॥ मध्ये तु भास्करं विद्यात्क्रमेणैवं समर्चयेत् ॥ २ ॥ अतः परतरं नास्ति सिद्धिकामस्य पांडव ॥ महातेजः समुद्यंतं

प्रणमेत्स कृतांजलिः ॥ ३ ॥ सकेसराणि पद्मानि करवीराणि चार्जुन॥तिलतंदुलसंयुक्तकुशगंधोदकेन च ॥४॥ रक्तचंदनमिश्राणि कृत्वा वै ताम्रभाजने ॥ धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणिं स्पृशेत् ॥५॥ मंत्रपूतं गुडाकेश चार्घ्यं दद्याद्भस्तये ॥ सायुधं सरथं चैव सूर्यमावाहयाम्यहम् ॥ ६ ॥ स्वागतो भव ॥ सुप्रतिष्ठितो भव ॥ सन्निधौ भव ॥ सन्निहितो भव ॥ संमुखो भव ॥ इति पंचमुद्राः ॥ ॥ स्फुटयित्वार्हयेत्सूर्यं भुक्तिं मुक्तिं लभेन्नरः ॥ ७ ॥ ॐ श्रीं विद्यां किलिकिलिकटकेष्टसर्वार्थसाधनाय स्वाहा ॥ ॐ श्रीं ह्रीं ह्रः हंसः सूर्याय नमः स्वाहा ॥ ॐ श्रीं ऱ्हां ऱ्हीं ऱ्हूं ऱ्हैं ऱ्हौं ऱ्हः सूर्यमूर्तये स्वाहा ॥ ॐ श्रीं ऱ्हींखंखः लोकाय सर्वमूर्तये स्वाहा ॥ ॐ ऱ्हूंमार्तंडाय स्वाहा ॥ नमोऽस्तु सूर्याय सहस्रभानवे नमोऽस्तु वैश्वानर जातवेदसे ॥ त्वमेव

चार्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते ॥ ८ ॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे ॥ दत्तमर्घ्यं मया भानो त्वं गृहाण नमोऽस्तु ते ॥ ९ ॥ एहि सूर्यसहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहाणार्घ्यं नमोऽस्तु ते ॥१०॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे ॥ ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोऽस्तु ते ॥ ११ ॥ सर्वदेवाधिदेवाय आधिव्याधिविनाशिने ॥ इदं गृहाण मे देव सर्वव्याधीर्विनश्यतु ॥ १२ ॥ नमः सूर्याय शांताय सर्वरोगविनाशिने ॥ ममेप्सितं फलं दत्त्वा प्रसीद परमेश्वर ॥ १३ ॥ ॐ नमो भगवते सूर्याय स्वाहा ॥ ॐ शिवाय स्वाहा ॥ ॐ सर्वात्मने सूर्याय नमः स्वाहा ॥ ॐ अक्षय्यतेजसे नमः स्वाहा ॥ सर्वसंकटदारिद्र्यं शत्रुं नाशय नाशय ॥ सर्वलोकेषु विश्वात्मा सर्वात्मा सर्वदर्शकः ॥ १४ ॥ नमो भगवते

सूर्य कुष्ठरोगान् विखंडय ॥ आयुरारोग्यमैश्वर्यं देहि देव नमोऽस्तु ते ॥ १५ ॥ नमो भगवते तुभ्यमादित्याय नमो नमः ॥ ॐअक्षय्यतेजसे नमः ॥ ॐसूर्याय नमः ॥ ॐविश्वमूर्तये नमः ॥ आदित्यं च शिवं विद्याच्छिवमादित्यरूपिणम् ॥ उभयोरंतरं नास्ति आदित्यस्य शिवस्य च ॥ १६ ॥ एतदिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरः ॥ उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः ॥ १७ ॥ अस्तमाने स्वयं विष्णुस्त्रिमूर्तिश्च दिवाकरः ॥ नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे ॥ १८ ॥ ममेदमर्घ्यं प्रतिगृह्य देव देवाधिदेवाय नमो नमस्ते ॥ श्रीसूर्याय सांगाय सपरिवाराय श्रीसूर्यनारायणायेदमर्घ्यं० ॥१९॥ हिमघ्नाय तमोघ्नाय रक्षोघ्नाय च ते नमः ॥ कृतघ्नघ्नाय सत्याय तस्मै सूर्यात्मने नमः ॥१२०॥जयो जयश्च विजयो जितप्राणो जितश्रमः ॥ मनोजवो

जितक्रोधो वाजिनः सप्त कीर्तिताः ॥ २१ ॥ हरितहयरथं दिवाकरं कनकमयांबुजरेणुपिंजरम् ॥ प्रतिदिनमुदये नवं नवं शरणमुपैमि हिरण्यरेतसम् ॥ २२ ॥ न च व्यालाः प्रबाधंते न व्याधिभ्यो भयं भवेत् ॥ न नागेभ्यो भयं चैव न च भूतभयं क्वचित् ॥ २३ ॥ अग्निशत्रुभयं नास्ति पार्थिवेभ्यस्तथैव च ॥ दुर्गतिं तरते घोरां प्रजां च लभते पशून् ॥ २४ ॥ सिद्धिकामो लभेत्सिद्धिं कन्याकामस्तु कन्यकाम् ॥ एतत्पठेत्स कौन्तेय भक्तियुक्तेन चेतसा ॥ २५ ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ कन्याकोटिसहस्रस्य दत्तस्य फलमाप्नुयात् ॥ २६ ॥ इदमादित्यहृदयं योऽधीते सततं नरः ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ २७ ॥ नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः ॥ प्रत्यक्षो भगवान् विष्णुर्येन विश्वं प्रतिष्ठितम् ॥ २८ ॥

नवतियोंजनं लक्षं सहस्राणि शतानि च ॥ यावद्भटीप्रमाणेन तावच्चरति भास्करः ॥ २९ ॥ गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम् ॥ तत्फलं लभते विद्वान् शांतात्मा स्तौति यो रविम् ॥ १३० ॥ योऽधीते सूर्यहृदयं स फलं सकलं लभेत् ॥ अष्टानां ब्राह्मणानां च लेखयित्वा समर्पयेत् ॥ ३१ ॥ ब्रह्मलोकऋषीणां च जायते मानुषोऽपि वा ॥ जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥ ३२ ॥ अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय ॥ सूर्याय सर्वप्रलयांतकाय नमो महाकारुणिकोत्तमाय ॥ ३३ ॥ विवस्वते ज्ञानभृदंतरात्मने जगत्प्रदीपाय जगद्धितैषिणे ॥ स्वयंभुवे दीप्तसहस्रचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ ३४ ॥ सुरैरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय ॥ महात्मने मोक्षपदाय नित्यं नमोऽस्तु ते वासरकारणाय॥३५॥

आदित्यश्चार्चितो देव आदित्यः परमं पदम् ॥ आदित्यो मातृ-
काभूत आदित्यो वाङ्मयं जगत् ॥ ३६ ॥ आदित्यं पश्यते
भक्त्या मां पश्यति ध्रुवं नरः ॥ नादित्यं पश्यते भक्त्या न स
पश्यति मां नरः ॥ ३७ ॥ त्रिगुणं च त्रितत्त्वं च त्रयो देवास्त्र-
योऽग्नयः ॥ त्रयाणां च त्रिमूर्तिस्त्वं तुरीयस्त्वं नमोऽस्तु ते ॥ ३८ ॥
नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयी-
मयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने ॥ ३९ ॥
यस्योदयेनेह जगत्प्रबुद्ध्यते प्रवर्तते चाखिलकर्मसिद्धये ॥ ब्रह्मे-
द्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः ॥ १४० ॥
नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वितसंभवात्मने ॥
सहस्रयोगोद्भवभावभागिने सहस्रसंख्यायुगधारिणे नमः
॥ ४१ ॥ यन्मंडलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम् ॥

दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥ ४२ ॥
यन्मंडलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् ॥
तदेव रूपं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥ ४३ ॥
यन्मंडलं ज्ञानमयं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ॥ समस्ततेजोमयदिव्यरूपं पुनातु मां तत्सवितुर्वरेण्यम् ॥ ४४ ॥ यन्मण्डलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् ॥ तत्सर्वपापक्षयकारणं च पुनातु मां० ॥४५॥ यन्मंडलं व्याधिविनाशदक्षं यदृग्यजुःसामसु संप्रगीतम् ॥ प्रकाशितं येन च भूर्भुवः स्वः पुनातु मां० ॥ ४६ ॥ यन्मंडलं वेदविदो विदंति गायंति यच्चारणसिद्धसंघाः ॥ यद्योगिनो योगजुषां च संघाः पुनातु मां तत्सवितु० ॥ ४७ ॥ यन्मंडलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके ॥ यत्कालकालाद्यमनादिरूपं पुनातु मां तत्सवितु०

॥ ४८ ॥ यन्मंडलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् ॥ यत्कालकल्पक्षयकारणं च पुनातु० ॥ ४९ ॥ यन्मंडलं विश्वसृजां प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् ॥ यस्मिन् जगत्संहरतेऽखिलं च पुनातु० ॥ १५० ॥ यन्मंडलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् ॥ सूक्ष्मांतरैर्योगपथानुगम्यं पुनातु० ॥ ५१ ॥ यन्मंडलं ब्रह्मविदो विदंति गायंति यच्चारणसिद्धसंघाः ॥ यन्मंडलं वेदविदः स्मरंति पुनातु० ॥ ५२ ॥ यन्मंडलं वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम् ॥ तत्सर्ववेदं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥ ५३ ॥ मंडलाष्टमिदं पुण्यं यः पठेत्सततं नरः ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ ५४ ॥ ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटी हारी

हिरण्मयवपुर्धृतशंखचक्रः ॥५५॥ सशंखचक्रं रविमंडले स्थितं कुशेशयाक्रांतमनन्तमच्युतं ॥ भजामि बुद्ध्या तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्वलम् ॥५६॥ एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ॥ कीर्तयंति सुरश्रेष्ठं देवं नारायणं विभुम् ॥ ५७ ॥ वेदवेदांगशारीरं दिव्यदीप्तिकरं परम् ॥ रक्षोघ्नं रक्तवर्णं च सृष्टिसंहारकारकम् ॥ ५८ ॥ एकचक्रो रथो यस्य दिव्यः कनकभूषितः ॥ स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥५९॥ आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः ॥ तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥ ६० ॥ पंचमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः ॥ सप्तमं हरिदश्वश्च अष्टमं च विभावसुः ॥ ६१ ॥ नवमं दिनकृत्प्रोक्तं दशमं द्वादशात्मकं ॥ एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव च ॥ ६२ ॥ द्वादशादित्यनामानि प्रातःकाले पठे-

नरः ॥ दुःस्वप्ननाशनं चैव सर्वदुःखं च नश्यति ॥ ६३ ॥ दद्रुकुष्ठहरं चैव दारिद्र्यं हरते ध्रुवम् ॥ सर्वतीर्थप्रदं चैव सर्वकामफलप्रदं ॥ ६४ ॥ यः पठेत्प्रातरुत्थाय भक्त्या नित्यमिदं नरः ॥ सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च ॥ ६५ ॥ अग्निमीळे नमस्तुभ्यमिषेत्वोर्जेस्वरूपिणे ॥ अग्न आयाहि वीतस्त्वां नमस्ते ज्योतिषां पते ॥ ६६ ॥ शन्नो देवी नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते ॥ पंचमायोपवेदाय नमस्तुभ्यं नमो नमः ॥ ६७ ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥ ६८ ॥ आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने ॥ जन्मांतरसहस्रेषु दारिद्र्यं नोपजायते ॥ ६९ ॥ उदयगिरिमुपेतं भास्करं पद्महस्तं निखिलभुवननेत्रं रत्नरत्नोपमेयम् ॥ तिमिरकरिमृगेंद्रं बोधकं पद्मिनीनां सुरवरमभिवंदे सुंदरं विश्ववंद्यम् ॥ १७० ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयं संपूर्णम् ॥

॥ अथ सूर्यकवचं प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच ॥ शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ॥ शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ १ ॥ देदीप्यमानमुकुटं स्फुरन्मकरकुंडलम् ॥ ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ २ ॥ शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ॥ नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥ ३ ॥ घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः ॥ जिह्वां मे मानदः पातु कंठं मे सुरवंदितः ॥ ४ ॥ स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः ॥ पातु पादौ द्वादशात्मा सर्वांगं सकलेश्वरः ॥ ५ ॥ सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ॥ दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥ ६ ॥ सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ॥ स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति ॥ ७ ॥

इति श्रीयाज्ञवल्क्यप्रणीतं सूर्यकवचस्तोत्रं संपूर्णम् ॥

इदं पुस्तकं नारायण राम आचार्य "काव्यतीर्थ" इत्यनेन संशोधितं, तच्च मुम्बय्यां सत्यभामाबाई पाण्डुरङ्ग इत्येताभिः निर्णयसागराख्य-मुद्रणयंत्रालये मुद्रापयित्वा तस्यैव कृते प्रकाशितम् ।

शके १८६७, सन १९४५.

इति सूर्यकवचसमेतम्

आदित्यहृदयं समाप्तम् ॥

पब्लिशर–सत्यभामाबाई पांडुरंग.
प्रिंटर–रामचद्र येसू शेडगे.
निर्णयसागर प्रेस
नं० २६–२८ कोलभाट स्ट्रीट मुंबई.